# Naradakritashiva Stuti Evam Shivaprakatya

# નારદકૃતાશિવસ્તુતિઃ એવં શિવપ્રાકટ્ય

## Document Information

Text title : Naradakritashiva Stuti Evam Shivaprakatya

File name : shivastutiHnAradakRRitAshivaprAkaTya.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 5 - jaigIShavyaprasAdakaraNam | 35-54||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# નારદકૃતાશિવસ્તુતિઃ એવં શિવપ્રાકટ્ય

શિવ શિવ ભવ હર દેવશાસન નગશર પાહિ દયાકટાક્ષસારૈઃ ।
ભવ ભવજનિતાં રુજં હરાશુ પ્રમથાધીશ્વર વીર ધીર પાહિ ॥ ૩૫॥

શિવ શિવ દહનાબ્જમિત્રસોમપ્રકટવિલોચન કૃત્તિવાસ શમ્ભો ।
તવ શિવ કૃપયા સ્મરાન્ધકારે ભવ ભવશમનાદ્ભયં ન ચૈવ ॥ ૩૬॥

હરગિરિસુતયા સદોપકણ્ઠ પ્રબલગરાશન નીલનીલકણ્ઠ ।
હૃદિભવયમિનાં કિલોપકણ્ઠ પ્રથિતમહોરગભોગશોભિકણ્ઠ ॥ ૩૭॥

હર હર શમનૈકભીતિજાતં હર હર ભવજાતઘોરદુઃખમ્ ।
હર હર પાપમપાકુરુષ્વ શમ્ભો હર હર મુરજિત્સુપૂજિતાઙ્ઘ્રે ॥ ૩૮॥

શમ્ભો શઙ્કર ચન્દ્રશેખર દયાસારામરાધીશ્વર
પાપાપારજલાબ્ધિશોષણમહાબાડવ્યવહ્ને શિવ ।
કાન્તાર્ધાકૃતિશોભિતાઙ્ગ કમલાકાન્તાક્ષિપૂજ્યાઙ્ઘ્રિક
વિશ્વેશાનવિધિપ્રચણ્ડશિરસાલગ્નપ્રયાણે હર ॥ ૩૯॥

શૂલપ્રોત્થિતદક્ષવક્ષહરણ ત્ર્યક્ષામરાધીશ્વર
પાહીમઞ્જનમર્ભકં તવ વિભો ભાવૈકલભ્યપ્રભો ।
ગાનં તે શ ૃણુ નારદસ્ય હિ મુખાદ્વીણાક્વણન્મઞ્જુલમ્
(ગાનં સંશ ૃણુ દેવ નારદમુખાદ્વીણાક્વણન્મઞ્જુલમ્)
ભો ભો દેવવર પ્રસીદ ભગવન્દૃષ્ટિં કૃપાયાઃ કુરુ ॥ ૪૦॥

- -

ગાનાન્તે નારદમુખાદ્વીણાક્વણનમઞ્જુલમ્ ।
શ્રુત્વૈવં નન્દિકેશાદ્યા ગણાશ્શભોર્મહાત્મનઃ ॥ ૪૧॥

વ્યજિજ્ઞિપંસ્તેદેવાય શઙ્કરાય મહાત્મને ।
પ્રણમ્પ નન્દિકેશોઽપિ પિધાયાસ્યં કરેણ વે ॥

ઉવાચ દેવં વરદં પ્રસન્નાસ્યં ત્રિલોચનમ્ ॥

- -

નન્દિકેશ્વરઃ -

શમ્ભો શઙ્કર ધૂર્જટે ત્રિણયનાપારવ્યથાં સંહર

પારાવારમહાપ્રભાવ જગતાં વ્યાપારસારાદર ।

ત્વન્નામામૃતધારયા જગદિદં પ્રાપ્તસ્તવેશાન્તિકમ્

સમ્ભાવ્ય પ્રમથાધિનાથ પદવીં દ્રષ્ટું પદાબ્જં તવ ॥ ૪૩॥

દ્વારે તિષ્ઠતિ વારિતસ્સહિ મયા કિઞ્ચાજ્ઞયાશુપ્રભો

દેવાજ્ઞાવસરેણ તં ગમયિતું દિવ્યં મુનિં નારદમ્ ।

ત્વત્પાદામ્બુજલોલમિષ્ટમનસં સર્વૈર્વિશિષ્ટાન્તરમ્

ભક્તિજ્ઞાનવિરક્તિશાલિસુખિતઃ પાદૌ દિદૃક્ષુઃ પ્રભો ॥ ૪૪॥

(ભક્તિજ્ઞાનપુરસ્કૃતસ્તવપદદ્વન્દ્વાવલોકોત્સુકઃ) ॥ ૪૪॥

- -

નન્દિકેશવચશ્શ્રુત્વા કટાક્ષાગ્રેણ શઙ્કરઃ ।

સંજ્ઞાં ચક્રેઽખિલેશ્આનો નારદાગમનં પ્રતિ ॥ ૪૫॥

નારદોઽપિ ચ દેવેશં નતા તુષ્ટાવ હિર્ષિતઃ ।

શિપિવિષ્ટં મહાદેવમષ્ટાકૃતિમનોહરઃ ॥ ૪૬॥

- -

નારદઃ -

જય જય દેવ મહેશ ધૂર્જટે જયજય વિશ્વવિધાન દક્ષશિક્ષ ।

જય જય વિશ્રુતવેદગીતકીર્તે જય જય ભક્તજનાર્પિતૈકભુક્તે ॥ ૪૭॥

જય જય ભગવંસ્તપઃક્રિયાણાં ફલદાનોન્મુખ પઞ્ચવક્ત્ર શમ્ભો ।

તવ શિવ ભગવન્પદાબ્જયુગ્મમભિપૂજ્ય સ્વહૃદા તપૈકરાશિઃ ॥ ૪૮॥

- -

મુનિરાસ્તે હિમવન્નગોર્ધ્વમૌલૌ તવ દિવ્યામૃતદેહલોકતૈકતર્ષઃ ।

ઇત્થં નારદવાક્યેન જાતહર્ષો મહેશ્વરઃ ।

જૈગીષવ્યં યયૌ દ્રષ્ટું નાનાગણવરૈર્વૃતઃ ॥ ૪૯॥

- -

આરુહ્ય શાક્કરં દિવ્યં નાનાલઙ્કારભૂષિતમ્ ।

નાનાગણમુખોદ્ગીતવાદ્યવૃન્દકૃતારવમ્ ॥ ૫૦॥

છત્રચામરહસ્તૈશ્ચ પતાકાવિધૃતૈર્ગણૈઃ ।
ઉમયા સ્કન્દહેરમ્બનન્દિભૃઙ્ગિગણાવૃતઃ ॥ ૫૧॥

ક્ષણેન હિમવન્મૌલિમાજગામ મહેશ્વરઃ ।
મુનિભિર્ગણમુખ્યૈશ્ચ મન્દસ્મિતમનોહરઃ ॥ ૫૨॥

ઉદ્યચ્છાઙ્કુધવલધાવલ્યાઙ્કુસમપ્રભઃ ।
ગઙ્ગાતુઙ્ગતરઙ્ગૌઘમૌલિદ્યુતિવિરાજિતઃ ॥ ૫૩॥

- -

દૃષ્ટા તં મુનિમેકાગ્રમાનસ સ મહેશ્વરઃ ।
દયાકટાક્ષામૃતસિન્ધુવર્ષૈર્વલ્મીકભૂતમ્મુનિમાવવર્ષ ।
સ ચોત્થિતો દેવવરં પ્રણમ્ય તુષ્ટાવ ચાષ્ટાકૃતિમપ્રમેયમ્ ॥ ૫૪॥

- -

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે નારદકૃતાશિવસ્તુતિઃ એવં શિવપ્રાકટ્ય ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૫ - જૈગીષવ્યપ્રસાદકરણમ્ । ૩૫-૫૪॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 5 - jaigIShavyaprasAdakaraNam . 35-54..

Notes:
Muni Nārada મુનિ નારદ eulogizes Śiva શિવ, wishing to see Him. Śiva શિવ; being apprised of the same by Nandikeśvara નન્દિકેશ્વર, manifests His Divine Appearance mounted on Nandi નન્દિ and accompanied by Umā ઉમા, Heramba હેરમ્બ, Skanda સ્કન્દ and His gaṇa-s ગણાઃ .

Encoded and proofread by Ruma Dewan

*Naradakritashiva Stuti Evam Shivaprakatya*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*